# Lekhini Stotram with 32 Names with Namavali

# લેખિનિ દ્વાત્રિંશન્નામસ્તોત્રમ્ નામાવલીસહિતા

## Document Information

Text title : Lekhini Stotram with 32 Names and Namvali

File name : lekhinIstotram.itx

Category : devii, devI, nAmAvalI, dashamahAvidyA

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : July 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 10, 2026

*sanskritdocuments.org*

# લેખિનિ દ્વાત્રિંશન્નામસ્તોત્રમ્ નામાવલીસહિતા

ભૈરવ ઉવાચ ।
ગુહ્યાનાં ગુહ્યરૂપાં તાં લેખિનીં લેખિકાં સદા ।
વક્ષ્યામિ દ્વાત્રિંશન્નામ્નાં સ્તોત્રં સિદ્ધિપ્રદં પરમ્ ॥ ૧॥

તસ્ય શ્રીદ્વાત્રિંશન્નામસ્તોત્રસ્ય ઋષિઃ શિવઃ સ્વયં સ્મૃતઃ ।
અનુષ્ટુપ્છન્દ ઉદ્ગીતં દેવતા લિઙ્ગલેખિની ॥ ૨॥

હકારબીજસંયુક્તં રકારઃ શક્તિરુચ્યતે ।
ઈકારઃ કીલકં પ્રોક્તો બિન્દુરસ્ત્રં પ્રકીર્તિતમ્ ॥ ૩॥

લેખભાગ્યપરિવર્તાય જપે વિનિયોગઃ સ્મૃતઃ ।
ધ્યાયેલ્લિઙ્ગાલિઙ્ગિનીં દેવીં લેખિનીં લેખિકાં પરામ્ ॥ ૪॥

ચતુર્ભુજાં દશભુજાં મહાબ્રહ્માણ્ડશાસિનીમ્ ।
મુણ્ડમાલાવૃતાં દેવીં વીણાલેખિનિહસ્તિકામ્ ॥ ૫॥

અથ સ્તોત્રમ્ ।
ૐ લેખિની લીલયા લક્ષ્યા લયાતીતા લસત્પ્રભા ।
લલામભૂતા લોકેશી લોકબીજા લસન્મતિઃ ॥ ૬॥

લીનતત્ત્વા લિપિશ્રીશા લક્ષણજ્ઞા લયેશ્વરી ।
લક્ષ્યાર્થા લલિતોદારા લુપ્તમાયાવિભેદિની ॥ ૭॥

લેશ્યાતીતા લોકમાતા લેખસૂત્રપ્રવર્તિની ।
લયરેખા લોકસાક્ષી લીલામૌનપ્રકાશિની ॥ ૮॥

લબ્ધબોધા લિઙ્ગરહિતા લોચનાતીતલોચના ।
લસદ્બોધા લોકગુહ્યા લીલાવર્ણપ્રસૂતિકા ॥ ૯॥

લોકાતીતા લયપ્રજ્ઞા લક્ષકોટિપ્રકાશિની ।
લેખવિદ્યા લબ્ધસિદ્ધિર્દ્વાત્રિંશન્નામભિઃ સ્તુતા ॥ ૧૦॥

એતાનિ નામાનિ નિત્યં યઃ પઠેદ્ભક્તિસંયુતઃ ।
નામપાઠમાત્રતોઽસ્ય પુનર્જન્મ ન વિદ્યતે ॥ ૧૧॥

શ્મશાને રાજદ્વારે ચ સઙ્ગ્રામે શત્રુસઙ્કટે ।
અરણ્યે દુર્ગમે માર્ગે જયસ્તસ્ય ન સંશયઃ ॥ ૧૨॥

દરિદ્રો લભતે લક્ષ્મીં નિરાશી લભતે શ્રિયમ્ ।
અકીર્તિર્લભતે કીર્તિં માનં લોકેષુ વિન્દતિ ॥ ૧૩॥

અપુત્રઃ પુત્રમાપ્નોતિ વિદ્યાર્થી લભતે શ્રુતિમ્ ।
મૂકો વાક્પતિરાયાતિ નિર્બલો બલવાન્ભવેત્ ॥ ૧૪॥

લિઙ્ગવિદ્યાપ્રસાદેન લિઙ્ગસિદ્ધિઃ પ્રજાયતે ।
અન્તર્બોધઃ પરો યસ્ય બહિઃ સિદ્ધિર્નિરન્તરા ॥ ૧૫॥

ભૌમામાવાસ્યકાલે તુ રક્તલેખ્યેન યત્નતઃ ।
ભૂર્જપત્રે સમાલિખ્ય પૂજયેદ્ગુરુમગ્રતઃ ॥ ૧૬॥

યસ્મિન્ગૃહે પ્રતિષ્ઠાપ્ય પૂજિતં ભક્તિભાવતઃ ।
તત્ર શ્રીર્નિશ્ચલા નિત્યં વૃદ્ધિર્ભવતિ સર્વદા ॥ ૧૭॥

ગુરું સમ્પૂજ્ય વિધિવત્ જપેન્મન્ત્રવિદાં વરઃ ।
દ્વાત્રિંશત્સહસ્રસઙ્ખ્યં પુરશ્ચર્યમુદાહૃતમ્ ॥ ૧૮॥

મોહરાત્રૌ વિશેષેણ કાલરાત્ર્યર્ધયામિનીમ્ ।
અષ્ટોત્તરશતાવૃત્ત્યા સ્તોત્રસિદ્ધિઃ પ્રજાયતે ॥ ૧૯॥

સિદ્ધે સ્તોત્રે મહેશાનિ વાક્સિદ્ધિઃ કરસંસ્થિતા ।
અણિમાદ્યષ્ટસિદ્ધયશ્ચ સેવન્તે તં નિરન્તરમ્ ॥ ૨૦॥

મહાપદ્માદિનવનિધયઃ સમ્પદઃ સકલાઃ શુભાઃ ।
સ્વયમેવોપતિષ્ઠન્તે પ્રસન્નાયાઃ પ્રસાદતઃ ॥ ૨૧॥

યદભીષ્ટં મનસ્યસ્ય તત્તદાપ્નોત્યસંશયમ્ ।
વિદ્યાં રાજ્યં યશઃ શ્રીં ચ સૌભાગ્યં ચ દિને દિને ॥ ૨૨॥

રહસ્યાદ્રહસ્યમેતન્ન દેયં યસ્ય કસ્યચિત્ ।
પરીક્ષ્ય ભક્તિસમ્પત્તિં તતઃ શિષ્યાય દાપયેત્ ॥ ૨૩॥

યોનિમુદ્રાં પ્રદર્શ્યાથ દશવારં સમાહિતઃ ।
પઠેદેતન્મહાસ્તોત્રં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૪॥

દેહઃ ક્ષેત્રં મનો યન્ત્રં પ્રાણો દીપઃ સનાતનઃ ।
ભક્તિઃ પુષ્પં ગુરુર્ધૂપઃ સ્વસંવિત્પરમં હવિઃ ॥ ૨૫॥

ન વેદૈર્ન તપોભિર્વા ન દાનૈર્યજ્ઞકોટિભિઃ ।
યાદૃશી જાયતે પ્રીતિઃ સ્તોત્રસ્યાસ્ય પ્રકીર્તનાત્ ॥ ૨૬॥

સર્વગોપ્યમિદં સ્તોત્રં દેવૈરપિ સુદુર્લભમ્ ।
ગુહ્યાદ્ગુહ્યતરં જ્ઞેયં સિદ્ધિદં મોક્ષદં પરમ્ ॥ ૨૭॥

ઇતિ શ્રી ભૈરવભૈરવી સંવાદે લેખિનીદ્વાત્રિંશન્નામસ્તોત્રં સમ્પૂર્ણમ્ ।

અથ નામાવલિઃ ।

શ્રીલેખિન્યૈ નમઃ ।
શ્રીલીલયાયૈ નમઃ ।
શ્રીલક્ષ્યાયૈ નમઃ ।
શ્રીલયાતીતાયૈ નમઃ ।
શ્રીલસત્પ્રભાયૈ નમઃ ।
શ્રીલલામભૂતાયૈ નમઃ ।
શ્રીલોકેશ્યૈ નમઃ ।
શ્રીલોકબીજાયૈ નમઃ ।
શ્રીલસન્મતૈ નમઃ ।
શ્રીલીનતત્ત્વાયૈ નમઃ । ૧૦
શ્રીલિપિશ્રીશાયૈ નમઃ ।
શ્રીલક્ષણજ્ઞાયૈ નમઃ ।
શ્રીલયેશ્વર્યૈ નમઃ ।
શ્રીલક્ષ્યાર્થાયૈ નમઃ ।
શ્રીલલિતોદારાયૈ નમઃ ।
શ્રીલુપ્તમાયાવિભેદિન્યૈ નમઃ ।
શ્રીલેશ્યાતીતાયૈ નમઃ ।
શ્રીલોકમાત્રે નમઃ ।
શ્રીલેખસૂત્રપ્રવર્તિન્યૈ નમઃ ।
શ્રીલયરેખાયૈ નમઃ । ૨૦
શ્રીલોકસાક્ષ્યૈ નમઃ ।

શ્રીલીલામૌનપ્રકાશિન્યૈ નમઃ ।
શ્રીલબ્ધબોધાયૈ નમઃ ।
શ્રીલિઙ્ગરહિતાયૈ નમઃ ।
શ્રીલોચનાતીતલોચનાયૈ નમઃ ।
શ્રીલસદ્બોધાયૈ નમઃ ।
શ્રીલોકગુહ્યાયૈ નમઃ ।
શ્રીલીલાવર્ણપ્રસૂતિકાયૈ નમઃ ।
શ્રીલોકાતીતાયૈ નમઃ ।
શ્રીલયપ્રજ્ઞાયૈ નમઃ । ૩૦
શ્રીલક્ષકોટિપ્રકાશિન્યૈ નમઃ ।
શ્રીલેખવિદ્યાયૈ નમઃ । ૩૨

ઇતિ લેખિનીદ્વાત્રિંશન્નામાવલિઃ સમ્પૂર્ણા ।

Encoded and proofread by Durga Sharma

*Lekhini Stotram with 32 Names with Namavali*

pdf was typeset on July 10, 2026

Please send corrections to *sanskrit@cheerful.com*